श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री गुरुवायुपुरेश्वर अष्टोत्तरशतनामावलिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री गुरुवायुपुरेश्वर अष्टोत्तरशतनामावलिः ॥

| | |
|---|---|
| 1 | ओं श्रीं ह्रीं क्लीं महावैकुण्ठनाथाख्याय नमः |
| 2 | ओं महानारायणाभिधाय नमः |
| 3 | ओं तारश्रीशक्तिकन्दर्पचतुर्बीजकशोभिताय नमः |
| 4 | ओं गोपालसुन्दरीरूपाय नमः |
| 5 | ओं श्रीविद्यामन्त्रविग्रहाय नमः |
| 6 | ओं रमाबीजसमारम्भाय नमः |
| 7 | ओं हृल्लेखासमलङ्कृताय नमः |
| 8 | ओं मारबीजसमायुक्ताय नमः |
| 9 | ओं वाणीबीजसमन्विताय नमः |
| 10 | ओं पराबीजसमाराध्याय नमः |
| 11 | ओं मीनकेतनबीजकाय नमः |
| 12 | ओं तारशक्तिरमायुक्ताय नमः |
| 13 | ओं कृष्णायपदपूजिताय नमः |
| 14 | ओं कादिविद्याद्यकूटाढ्याय नमः |
| 15 | ओं गोविन्दायपदप्रियाय नमः |

| | |
|---|---|
| **16** | ओं कामराजाख्यकूटेशाय नमः |
| **17** | ओं गोपीजनसुभाषिताय नमः |
| **18** | ओं वल्लभायपदप्रीताय नमः |
| **19** | ओं शक्तिकूटविजृम्भिताय नमः |
| **20** | ओं वह्निजायासमायुक्ताय नमः |
| **21** | ओं परावाङ्मदनप्रियाय नमः |
| **22** | ओं मायारमासुसम्पूर्णाय नमः |
| **23** | ओं मन्त्रराजकलेबराय नमः |
| **24** | ओं द्वादशावृतिचक्रेशाय नमः |
| **25** | ओं यन्त्रराजशरीरकाय नमः |
| **26** | ओं पिण्डगोपालबीजाढ्याय नमः |
| **27** | ओं सर्वमोहनचक्रगाय नमः |
| **28** | ओं षडक्षरीमन्त्ररूपाय नमः |
| **29** | ओं मन्त्रात्मरसकोणगाय नमः |
| **30** | ओं पञ्चाङ्गकमनुप्रीताय नमः |
| **31** | ओं सन्धिचक्रसमर्चिताय नमः |
| **32** | ओं अष्टाक्षरीमन्त्ररूपाय नमः |
| **33** | ओं महिष्यष्टकसेविताय नमः |

| | |
|---|---|
| 34 | ओं षोडशाक्षरीमन्त्रात्मने नमः |
| 35 | ओं कलानिधिकलार्चिताय नमः |
| 36 | ओं अष्टादशाक्षरीरूपाय नमः |
| 37 | ओं अष्टादशदलपूजिताय नमः |
| 38 | ओं चतुर्विंशतिवर्णात्मगायत्रीमनुसेविताय नमः |
| 39 | ओं चतुर्विंशतिनामात्मशक्तिबृन्दनिषेविताय नमः |
| 40 | ओं क्लीङ्कारबीजमध्यस्थाय नमः |
| 41 | ओं कामवीथीप्रपूजिताय नमः |
| 42 | ओं द्वात्रिंशदक्षरारूढाय नमः |
| 43 | ओं द्वात्रिंशद्भक्तसेविताय नमः |
| 44 | ओं पिण्डगोपालमध्यस्थाय नमः |
| 45 | ओं पिण्डगोपालवीथिगाय नमः |
| 46 | ओं वर्णमालास्वरूपाढ्याय नमः |
| 47 | ओं मातृकावीथिमध्यगाय नमः |
| 48 | ओं पाशाङ्कुशद्विबीजस्थाय नमः |
| 49 | ओं शक्तिपाशस्वरूपकाय नमः |
| 50 | ओं पाशाङ्कुशीयचक्रेशाय नमः |
| 51 | ओं देवेन्द्रादिप्रपूजिताय नमः |

| | |
|---|---|
| **52** | ओं भूर्जपत्रादौ लिखिताय क्रमाराधितवैभवाय नमः |
| **53** | ओं ऊर्ध्वरेखासमायुक्ताय नमः |
| **54** | ओं निम्नरेखाप्रतिष्ठिताय नमः |
| **55** | ओं सम्पूर्णमेरुरूपेण पूजितायाखिलप्रदाय नमः |
| **56** | ओं मन्त्रात्मवर्णमालाभिः सम्यक्शोभितचक्रराजे नमः |
| **57** | ओं श्रीचक्रबिन्दुमध्यस्थयन्त्रसंराड्वरूपकाय नमः |
| **58** | ओं कामधर्मार्थफलदाय नमः |
| **59** | ओं शत्रुदस्युनिवारकाय नमः |
| **60** | ओं कीर्तिकान्तिधनारोग्यरक्षाश्रीविजयप्रदाय नमः |
| **61** | ओं पुत्रपौत्रप्रदाय नमः |
| **62** | ओं सर्वभूतवेतालनाशनाय नमः |
| **63** | ओं कासापस्मारकुष्ठादिसर्वरोगविनाशकाय नमः |
| **64** | ओं त्वगादिधातुसम्बद्धसर्वामयचिकित्सकाय नमः |
| **65** | ओं डाकिन्यादिस्वरूपेण सप्तधातुषु निष्ठिताय नमः |
| **66** | ओं स्मृतिमात्रेणाष्टलक्ष्मीविश्राणनविशारदाय नमः |
| **67** | ओं श्रुतिमौलिसमाराध्यमहापादुकलेबराय नमः |
| **68** | ओं महापदावनीमध्यरमादिषोडशीद्धिकाय नमः |
| **69** | ओं रमादिषोडशीयुक्तराजगोपद्वयान्विताय नमः |

| | |
|---|---|
| **70** | ओं श्रीराजगोपमध्यस्थमहानारायणद्विकाय नमः |
| **71** | ओं नारायणद्वयालीढमहानृसिंहरूपकाय नमः |
| **72** | ओं लघुरूपमहापादवे नमः |
| **73** | ओं महामहासुपादुकाय नमः |
| **74** | ओं महापदावनीध्यानसर्वसिद्धिविलासकाय नमः |
| **75** | ओं महापदावनीन्यासशताधिककलाष्टकाय नमः |
| **76** | ओं परमानन्दलहरीसमारब्धकलान्विताय नमः |
| **77** | ओं शताधिककलान्तोद्यच्छ्रीमच्चरणवैभवाय नमः |
| **78** | ओं शिर आदिब्रह्मरन्ध्रस्थानन्यस्तकलावलये नमः |
| **79** | ओं इन्द्रनीलसमच्छायाय नमः |
| **80** | ओं सूर्यस्पर्धिकिरीटकाय नमः |
| **81** | ओं अष्टमीचन्द्रबिभ्राजदलिकस्थलशोभिताय नमः |
| **82** | ओं कस्तूरीतिलकोद्भासिने नमः |
| **83** | ओं कारुण्याकुलनेत्रकाय नमः |
| **84** | ओं मन्दहासमनोहारिणे नमः |
| **85** | ओं नवचम्पकनासिकाय नमः |
| **86** | ओं मकरकुण्डलद्वन्द्वसंशोभितकपोलकाय नमः |
| **87** | ओं श्रीवत्साङ्कितवक्षःश्रिये नमः |

| | |
|---|---|
| 88 | ओं वनमालाविराजिताय नमः |
| 89 | ओं दक्षिणोरःप्रदेशस्थपराहङ्कृतिराजिताय नमः |
| 90 | ओं आकाशवत्क्रशिष्ठश्रीमध्यवल्लीविराजिताय नमः |
| 91 | ओं शङ्खचक्रगदापद्मसंराजितचतुर्भुजाय नमः |
| 92 | ओं केयूराङ्गदभूषाढ्याय नमः |
| 93 | ओं कङ्कणालिमनोहराय नमः |
| 94 | ओं नवरत्नप्रभापुञ्जच्छुरिताङ्गुलिभूषणाय नमः |
| 95 | ओं गुल्फावधिकसंशोभिपीतचेलप्रभान्विताय नमः |
| 96 | ओं किङ्किणीनादसंराजत्काञ्चीभूषणशोभिताय नमः |
| 97 | ओं विश्वक्षोभकरश्रीकमसृणोरुद्वयान्विताय नमः |
| 98 | ओं इन्द्रनीलाश्मनिष्पन्नसम्पुटाकृतिजानुकाय नमः |
| 99 | ओं स्मरतूणाभलक्ष्मीकजङ्घाद्वयविराजिताय नमः |
| 100 | ओं मांसलगुल्फलक्ष्मीकाय नमः |
| 101 | ओं महासौभाग्यसंयुताय नमः |
| 102 | ओं ह्रीङ्कारतत्त्वसम्बोधिनूपुरद्वयराजिताय नमः |
| 103 | ओं आदिकूर्मावतारश्रीजयिष्णुप्रपदान्विताय नमः |
| 104 | ओं नमज्जनतमोबृन्दविध्वंसकपदद्वयाय नमः |
| 105 | ओं नखज्योत्स्नालिशैशिर्यपरविद्याप्रकाशकाय नमः |

| | |
|---|---|
| **106** | ओं रक्तशुक्लप्रभामिश्रपादुकाद्वयवैभवाय नमः |
| **107** | ओं दयागुणमहावार्धये नमः |
| **108** | ओं गुरुवायुपुरेश्वराय नमः |

॥ इति श्री गुरुवायुपुरेश्वर अष्टोत्तरशतनामावलिः समाप्ता ॥